# Samskrita Bhasha nIrAjanA AratI

# संस्कृतभाषा-नीराजना (आरती)

## Document Information

Text title : Sanskrita Bhasha NirAjana Arati

File name : saMskRRitabhAShAnIrAjanA.itx

Category : AratI, misc, sahitya, sanskritgeet

Location : doc_z_misc_general

Transliterated by : Rishbha Bhagi

Proofread by : Rishbha Bhagi

Latest update : December 28, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 28, 2022

*sanskritdocuments.org*

# संस्कृतभाषा-नीराजना (आरती)

जय संस्कृतभाषे, जय संस्कृतभाषे,
कुरु करुणां करुणार्द्रे, कुरु करुणां करुणार्द्रे, त्वच्छरणे दासे ॥ जय ॥ ध्रु.॥

वेदा भगवद्गीता उपनिषदः सर्वाः, उपनिषदः सर्वाः
तव वै दिव्यशरीरं, तव वै दिव्यशरीरं यैस्त्वं सद्भर्वा ॥ जय ॥ १
कपिलपतञ्जलिशङ्करगोतमकणमुग्भिः, गोतमकणमुग्भिः,
जैमिनिमुख्यैर्मुनिभिः जैमिनिमुख्यैर्मुनिभिरिष्टा बहुसद्भिः ॥ जय ॥ २
व्यासः कालीदासो भारविकविबाणौ, भारविकविबाणौ-
भवभूतिर्भवभूतिः, भवभूतिर्भवभूतिः, भासश्रीहर्षौ ॥ जय ॥ ३
कोऽन्यो लोके यो वै समतामेषां कुरुताम्, समतामेषां कुरुतां
वाल्मीकिश्च सुबन्धुः, वाल्मीकिश्च सुबन्धुः, क्वान्यस्यामास्ते ॥ जय ॥ ४
वेदौ ज्योतिर्धनुषोः पुनरायुर्वेदः पुनरायुर्वेदः-
अतुलरसायनशास्त्रं, अतुलरसायनशास्त्रं कस्तुलयेल्लोके ॥ जय ॥ ५
किं तच्छास्त्रं लोके न त्वं यन्मूलं, न त्वं यन्मूलं,
नास्ति जगद्धितकारिणि, नास्ति जगद्धितकारिणि, जनसुखमनुकूलम् ॥ जय ॥ ६
विश्वस्मिन् विश्वेऽस्मिन् शान्तिश्चेन्मृग्या, शान्तिश्चेन्मृग्या-
त्वच्चरणौ हित्त्वा नो, त्वच्चरणौ हित्त्वा नो गतिरिह जनवासे ॥ जय ॥ ७
जनिमरणाद्धुतदुःखैः परिपूर्णे भुवने, परिपूर्णे भुवने
तव चरणौ किल शरणं, तव चरणौ किल शरणं स्यातामाशासे ॥ जय ॥ ८
वयमपि भवभयभीता भी-तापह-रूपाम्, भी-तापह-रूपाम्-
त्वां शरणं प्राप्ताः, कुरु त्वां शरणं प्राप्ताः, कुरु करुणां करुणार्द्रे ॥ जय ॥ ९
त्यक्त्वा खर्वं कूपं जलनिधिरुपसेव्यः, जलनिधिरुपसेव्यः-
विश्वे विश्वजना इह, विश्वे विश्वजना इह सादरमर्थ्यन्ते ॥ जय ॥ १०
रामः परशुसपूर्वोऽपूर्वैः स्तुतिदीपैः, मातः स्तुतिदीपैः-
आरार्त्तिक्यं कुर्वन्, आरार्त्तिक्यं कुर्वन् त्वच्चरणौ श्रयते ॥ जय ॥ ११

रचयिता परशुरामः

शास्त्री, व्याकरणाचार्यः, पुरा जम्बूनगरस्थ-श्रीरघुनाथसंस्कृतमहाविद्यालयस्य)

Encoded and proofread by Rishbha Bhagi

*Samskrita Bhasha nIrAjanA AratI*

pdf was typeset on December 28, 2022

Please send corrections to *sanskrit@cheerful.com*